**ज्वरकेशरिन्** पु० ज्वरस्य तद्रूपगजस्य केशरीव हन्तृत्वात्। "शुद्धसूतं विषं व्योषं गन्धं त्रिफलमेव च। जयपालसमं कृत्वा भृङ्गतोयेन मर्द्दयेत्। गुञ्जामात्रा वटी कार्य्या बालानां सर्षपाकृतिः। सितया च समं पीता पित्तज्वरविनाशिनी। मरिचेन प्रयुक्ता सा सन्निपातज्वरापहा। पिप्पलीजीरकाभ्याञ्च दाहज्वरविनाशिनी। ज्वरकेशरिनामायं रसो ज्वरविनाशनः" भैषज्यर० उक्ते औषधभेदे।

**ज्वरघ्न** पु० ज्वरं हन्ति हन—अमनुष्यकर्त्तरि टक्। १गुडूच्याम्, २वास्तूके ३ज्वरनाशके त्रि०शब्दार्थ०। ४मञ्जिष्ठायां स्त्री ङीप्। राजनि०।

**ज्वरधूमकेतुरस** पु० ज्वरस्य धूमकेतुरग्निरिव दाहकत्वात् कर्म०। "भवेत् समं सूतसमुद्रफेनं हिङ्गूलगन्धं परिमर्द्य यत्नात्। नवज्वरे वल्लमितं त्रिवल्लमार्द्राम्बुनाऽयं ज्वरधूमकेतुः" भैषज्यर० उक्ते औषधभेदे।

**ज्वरनागमयूरचूर्ण** न० ज्वर एव नागः सर्पस्तस्य मयूर इव हिंसकत्वात् कर्म०।

"लौहाभ्रटङ्गनं ताम्रं तालकं वङ्गमेव च। शुद्धसूतं गन्धकञ्च शिग्रुवीजं फलत्रिकम्। चन्दनातिविषा पाठा वचा च रजनीद्वयम्। उशीरं चित्रकं देवकाष्ठञ्च सपटोलकम्। जीवकर्षभकाजाजग्रन्थालीशं वंशलोचना। कण्टकारीफलं मूलं शटीपत्रं कटुत्रयम्। गुडूची सत्वधन्याकं कटुका चैत्रपर्पटी। मुस्तकं बालकं विल्वं यष्टीमधुसमं समम्। भागाच्चतुर्गुणं देयं कृष्णजीरस्य चूर्णकम्। तत्समं तालपुष्पञ्च चूर्णं दग्धोत्पलाभवम्। कैरातं तत्समं देयं तत्समं चपलाभवम्। एतच्चूर्णं समाख्यातं ज्वरनागमयूरकम्। प्रतिकर्षमितं खाद्यं युक्त्या वा रुचिवर्द्धनम्। सन्ततादिज्वरं हन्ति साध्यासाध्यं न संशयः। चयोद्भवञ्च धातुस्थं कामशोकोद्भवं ज्वरम्। भूतावेशज्वरञ्चैवमभिचारसमुद्भवम्। दाहशीतज्वरं घोरं चातुर्थ्यादिविपर्य्ययम्। जीर्णञ्च विषमं सर्वं प्लीहानमुदरं तथा। कामलां पाण्डुरोगञ्च शोथं हन्ति न संशयः। भ्रमं तृष्णाञ्च कासञ्च शूलानाहौ चयं तथा। यकृतं गुल्ममशूलञ्च आमवातं निहन्ति च। त्रिकपृष्ठकटीजानुपार्श्वानां शूलनाशनम्। अनुपानं शीतजलं न देयमुष्णवारिणा" भैषज्यर० उक्ते औषधभेदे

**ज्वरबलि** पु० ज्वरशान्त्यै देयो बलिः शाक०। भैषज्यर० उक्ते ज्वरनाशके बलिभेदे तत्प्रकारो यथा

"ज्वरामयग्रहीतस्य सुष्टिभिर्नवभिः कृतम्। तण्डुलैरोदनं तेन कुर्य्यात् पुत्तलकं शुभम्। तं हरिद्रावलिप्ताङ्गं चतुःपीतध्वजान्वितम्। हरिद्रारसपूर्णाभिः पुटिकाभिस्ततस्त्रिभिः। मण्डितं गन्धपुष्पाद्यैरवकीर्य्य विसर्जयेत्। एवं दिनत्रयं कुर्य्यात् ज्वररोगोपशान्तये" (ओदनेन पुत्तलं निर्म्माय वीरणचाचिकायां संस्थाप्य हरिद्राभिरवलिप्य चतुःपीतपताकाभिरलङ्कृत्य गन्धपुष्पाद्यैरवकीर्य्य हरिद्रारसपूर्णास्तस्रः पुटिकास्तत्कोणे संस्थाप्याः)। पुटिका अश्वत्थपत्ररचितठोङ्गा। अन्योऽपि प्रकारो विधानपारिजातादौ द्रष्टव्यः।

**ज्वरभैरवचूर्ण** न० ज्वरस्य भैरव इव विनाशकत्वात् कर्म०। "नागरं त्रायमाणा च पिचुमर्द्दो दुरालभा। पथ्या मुस्तं वचा दारु व्याघ्री शृङ्गी शतावरी। पर्पटं पिप्पलीमूलं विशाला पुष्करं शटी। मूर्वा कृष्णा हरिद्रे द्वे लोध्रचन्दनशुण्ठकम्। कुटजस्य फलं वल्कं यष्टीमधुकचित्रकम्। शोभाञ्जनं बला चातिविषा च कटुरोहिणी। मघली पद्मकाष्ठञ्च यमानी शालपर्णिका। मरिचं चामृता विल्वं बालं पङ्कस्य पर्पटी। तेजपत्रं त्वचं धात्री पृश्निपर्णी पटोलकम्। गन्धकं पारदं लौहमभ्रकञ्च मनःशिला। एतेषां समभागेन चूर्णमेव विनिर्दिशेत्। तदर्द्धं प्रक्षिपेत्तत्र चूर्णं भूनिम्बसम्भवम्। मात्रामस्य प्रयुञ्जीत दृष्ट्वा दोषबलाबलम्। चूर्णं भैरवसंज्ञन्तु ज्वरान् हन्ति न संशयः। पृथग्दोषांश्च विविधान् समस्तान् विषमज्वरान्। द्वन्द्वजान् सन्निपातोत्थान् मानसानपि नाशयेत्। प्राकृतं वैकृतञ्चैव सौम्यं तीक्ष्णमथापि वा। अन्तर्गतं बहिःस्थञ्च निरामं साममेव च। ज्वरमष्टविधं हन्ति साध्यासाध्यं न संशयः। नानादेशोद्भवञ्चैव वारिदोषभवं तथा। विरुद्धभेषजभवं ज्वरमाशु व्यपोहति। अग्निमान्द्यं यकृत् प्लीहा पाण्डुरोगमरोचकम्। उदराण्यन्त्रवृद्धिञ्च रक्तपित्तं त्वगामयम्। श्वयथुञ्च शिरःशूलं वातामयरुजां जयेत्। ज्वरभैरवसंज्ञन्तु भैरवेण कृतं शुभम्" भैषज्यर० उक्ते औषधभेदे।

**ज्वरभैरवरस** पु० ज्वरे भैरव इव नाशकत्वात् कर्म्म०। "त्रिकटु त्रिफला टङ्कविषगन्धकपारदम्। जेपालञ्च समं मर्द्यं द्रोणपुष्पीरसैर्दिनम्। ताम्बूलेन समं खादेदर्द्धगुञ्जामितां वटीम्। मुद्गयूषं शिखरिणी पथ्यं देयं प्रयत्नतः। नवज्वरं त्रिदोषोत्थं जीर्णञ्च विषमज्वरम्। दिनैकेन निहन्त्याशु रसोऽयं ज्वरभैरवः" भैषज्यर० उक्ते औषधभेदे।